**SET-4**

**Series BVM/C**

कोड नं.
**Code No. 49**

रोल नं.
Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।

Candidates must write the Code on the title page of the answer-book.

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **13** हैं ।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **12** प्रश्न हैं ।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें ।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।
- Please check that this question paper contains **13** printed pages.
- Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **12** questions.
- **Please write down the Serial Number of the question before attempting it.**
- 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period.

# संस्कृतम् (ऐच्छिकम्)

# SANSKRIT (Elective)

*समयो : होरात्रयम्* | *पूर्णाङ्काः : 100*

*निर्धारित समय : 3 घण्टे* | *अधिकतम अंक : 100*

*Time allowed : 3 hours* | *Maximum Marks : 100*

*निर्देशाः :*

*निर्देश :*

***Instructions :***

*संकेताभावे सर्वेषां प्रश्नानामुत्तराणि, संस्कृतेनैव लेखनीयानि ।*
*जहाँ संकेत न हो, वहाँ सभी प्रश्नों के उत्तर संस्कृत में ही लिखें ।*

*Answer all questions in Sanskrit, unless instructions are given otherwise.*

*अस्मिन् प्रश्नपत्रे **चत्वारः** खण्डाः सन्ति ।*

*इस प्रश्न-पत्र में **चार** खण्ड हैं ।*

*There are **four** sections in this question paper.*

| | | |
|---|---|---|
| खण्डः क | अपठितांश – अवबोधनम् (अपठितांश – अवबोधन) | 15 अङ्काः |
| SECTION A | (Unseen Reading Comprehension) | |
| खण्डः ख | संस्कृतेन रचनात्मकलेखनम् (संस्कृत में रचनात्मक लेखन) | 15 अङ्काः |
| SECTION B | (Writing Skills in Sanskrit) | |
| खण्डः ग | पठितांश – अवबोधनं संस्कृतसाहित्यस्य परिचयः च | |
| | (पठितांश – अवबोधन एवं संस्कृत साहित्य का परिचय) | 40+10=50 अङ्काः |
| SECTION C | (Reading Comprehension and Introduction to History of Sanskrit Literature) | |
| खण्डः घ | छन्दोऽलङ्काराः (छन्द एवं अलङ्कार) | 20 अङ्काः |
| SECTION D | (Metres and Figures of Speech) | |

## खण्डः क (SECTION A)

## अपठितांश – अवबोधनम्

## अपठितांश – अवबोधन

## Unseen Reading Comprehension

*15 अङ्काः*

**1.** अधोलिखितम् अनुच्छेदद्**द्वयं** पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत :

निम्नलिखित **दोनों** अनुच्छेदों को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए :

Read the following **two** passages and answer the given questions in Sanskrit :

(क) प्रथम: अनुच्छेद:

स्वच्छता द्विधा भवति – आन्तरिकी बाह्या च । अस्माकं मन: काम-क्रोध-लोभ-मोह-मात्सर्य-आलस्येति दोषै: शून्यं स्यात् – इत्येतदर्थं प्रयासान् विधातुं सर्वाणि शास्त्राणि अदिशन्ति । एवमेव बाह्यस्वच्छता अपि आवश्यकी । अस्माकं निवास-विद्यालय-कार्यालय-सार्वजनिकेषु सर्वेषु स्थानेषु स्वच्छतापालनम् परमावश्यकम् । देशे तीर्थस्थानेषु प्रभूतमात्रायाम् अवकरराशि: प्रकीर्ण: दृश्यते, येन वैदेशिका: भारतं प्रशंसनीयदृशा न व्यवहरन्ति । एतत्सर्वं वीक्ष्य अस्माकं प्रधानमन्त्रिणा स्वच्छताभियानं प्रवर्तितम् । अस्मिन् अभियाने समाजस्य प्रतिष्ठिता: नागरिका: लोकान् स्वच्छतापरिपालनाय जागरूकान् कुर्वन्ति । अत एव साम्प्रतं पूर्वापेक्षया देशस्य ग्रामेषु नगरेषु अन्यत्र च समधिकं स्वच्छतामयपरिवेश: दृश्यते ।

**प्रश्ना:**

(अ) एकपदेन उत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. $\frac{1}{2} \times 2 = 1$

(i) अस्माकं मन: कै: दोषै: शून्यं स्यात् ?

(ii) प्रतिष्ठिता: नागरिका: लोकान् किमर्थं जागरूकान् कुर्वन्ति ?

(ब) पूर्णवाक्येन उत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. $2 \times 1 = 2$

वैदेशिका: कुत: भारतं प्रशंसनीयदृशा न व्यवहरन्ति ?

(स) यथानिर्देशम् उत्तरत ।
निर्देशानुसार उत्तर दीजिए ।
Answer as directed. $\frac{1}{2} \times 4=2$

(i) 'उपदिशन्ति' इति क्रियापदस्य कर्तृपदं किम् ?
(ii) 'अधुना' इति पदस्य किं समानार्थकम् अत्र प्रयुक्तम् ?
(iii) 'युष्माकम्' इति पदस्य किं विलोमपदमत्र प्रयुक्तम् ?
(iv) 'प्रतिष्ठिताः' इति विशेषणस्य विशेष्यं किम् ?

(ख) द्वितीयः अनुच्छेदः

रामायणे न केवलं राम-रावणयोर्मध्ये संजातस्य युद्धस्य वर्णनमस्ति, अपितु नैके अन्ये उपयोगिनः महत्त्वपूर्णविषयाः अपि विचारिताः । यदा भरतः चित्रकूटं गत्वा श्रीरामं मिलति, तदा परस्परं भ्रात्रोः वार्तालापे नैके महत्त्वपूर्णा राजनीतिकविषयाः अपि चर्चिताः । चर्चामध्ये रामेण सम्मतिः प्रदत्ता यद् राज्यस्य व्ययः राजस्व प्राप्त्यपेक्षया न्यून एव स्यात् — *एतदेवात्र पाण्डित्यम् यद् आयाद् अल्पतरो व्ययः* । इयं शिक्षा न केवलं राज्ञाम्, अपितु प्रत्येकं गृहस्थस्य कृतेऽपि अतीवोपयोगिनी महत्त्वपूर्णा च ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. *1×2=2*

(i) रामरावणयोर्मध्ये संजातस्य युद्धस्य वर्णनं कुत्र अस्ति ?
(ii) भरतः कुत्र रामं मिलति ?

(ब) पूर्णवाक्येन उत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. *2×1=2*

रामेण कीदृशी सहमतिः प्रदत्ता ?

(स) यथानिर्देशम् उत्तरत ।
निर्देशानुसार उत्तर दीजिए ।
Answer as directed. *1×4=4*

(i) 'स्यात्' इति क्रियापदस्य कर्तृपदं किम् ?
(ii) 'गृहीता' इति पदस्य किं विलोमपदमत्र प्रयुक्तम् ?
(iii) 'उपयोगिनः' इति विशेषणस्य विशेष्यं किम् ?
(iv) 'चातुर्यम्' इत्यस्य कृते समानार्थकम् किम् ?

(द) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत ।
इस अनुच्छेद के लिए उपयुक्त शीर्षक संस्कृत में लिखिए ।
Write a suitable title for this passage in Sanskrit. *2*

## खण्डः ख (SECTION B)

## संस्कृतेन रचनात्मकलेखनम्

## संस्कृत में रचनात्मक लेखन

## Writing Skills in Sanskrit

*15 अङ्काः*

**2.** मञ्जूषातः उचितसङ्केतान् गृहीत्वा अधोलिखितां कथां पुनः पूरयित्वा लिखत :

मञ्जूषा से उचित सङ्केत लेकर निम्नलिखित कथा को पूरा करके लिखिए :

Complete and rewrite the following story, with the help of the words given in the box below : *1×10=10*

कथा

ब्रूसनामा एका (i) _________ आसीत् । कदाचन शत्रुभिः पराभूतः (ii) _________ सः वने शिलातलम् अधिशयानः आसीत् । तत्र सः एकं मकड़ी-नामकं (spider) कीटम् अपश्यत् । सः (iii) _________ भित्तेः आरोहणे असफले अपि (iv) _________ न अभूत् । अन्ते च दशमवारं स भित्तिम् (v) _________ । एतद् दृष्ट्वा सः (vi) _________ उत्साहेन परिपूर्णो (vii) _________ स्वसेनां (viii) _________ संघटितां कृत्वा शत्रोः (ix) _________ आक्रमणं कृत्वा (x) _________ संवृत्तः । सत्यमेव उक्तम् – "धैर्यं कदापि न त्याज्यम् ।"

**मञ्जूषा**

| |
|---|
| निराशः, आरूढवान्, विजयी, प्रयत्नविमुखः, उपरि, राजा, नवीनरूपेण, भूत्वा, वारं वारम्, नृपः । |

**3.** मञ्जूषातः पदानि चित्वा 'परोपकारः' इति विषयम् अधिकृत्य **पञ्च** वाक्यानि संस्कृतेन लिखत :

मञ्जूषा से पद चुनकर 'परोपकार' विषय पर संस्कृत में **पाँच** वाक्य लिखिए :

Write **five** sentences in Sanskrit on 'Paropakāra' with the help of the words given in the box below : *1×5=5*

**मञ्जूषा**

| |
|---|
| परस्य, स्वार्थे, सन्ति, महापुरुषाः, जीवने, नरः, कल्याणम्, पवित्रम्, भवति, स्वभावः, नद्यः, परोपकाराय, वृक्षाः, प्रसन्नाः, भवन्ति, विनम्रः, धर्मः । |

## खण्डः ग (SECTION C)

## पठितांश – अवबोधनं संस्कृतसाहित्यस्य परिचयः च

## पठितांश – अवबोधन एवं संस्कृत साहित्य का परिचय

## Reading Comprehension and Introduction to History of Sanskrit Literature

*40+10=50 अङ्काः*

**4.** अधोलिखितं गद्यांशं, पद्यं, नाट्यांशं च पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत :
निम्नलिखित गद्यांश, पद्य तथा नाट्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए :
Read the following prose, poetry and drama passages and answer the given questions in Sanskrit :

(क) **गद्यांश:**

न शीलं पश्यति । न श्रुतमाकर्णयति । न त्यागमाद्रियते । न विशेषज्ञतां विचारयति । न सत्यमवबुध्यते । पश्यत एव नश्यति । सरस्वतीपरिगृहीतं नालिंगति जनम् । गुणवन्तं न स्पृशति । सुजनं न पश्यति । शूरं कण्टकमिव परिहरति । विनीतं नोपसर्पति । तृष्णां संवर्धयति । लघिमानमापादयति । एवंविधयापि चानया कथमपि दैववशेन परिगृहीताः विक्लवाः भवन्ति राजानः, सर्वाविनयाधिष्ठानतां च गच्छन्ति ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. $\frac{1}{2}\times 2=1$

(i) लक्ष्मी: कं न पश्यति ?

(ii) लक्ष्मी: कं कण्टकमिव परिहरति ?

(ब) पूर्णवाक्येन उत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. *2×1=2*

लक्ष्मी: कं न आलिंगति ?

(स) यथानिर्देशम् उत्तरत ।
यथानिर्देश उत्तर दीजिए ।
Answer as directed. *1×2=2*

(i) 'दुर्जनम्' अस्य विलोमपदं किम् ?

(ii) 'भवन्ति' इति क्रियापदस्य कर्तृपदं किम् ?

(ख) **पद्यम्**

मनसि वचसि काये पुण्यपीयूषपूर्णा-स्त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः ।
परगुणपरमाणून् पर्वतीकृत्य नित्यं, निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ।।

**प्रश्नाः**

(अ) एकपदेन उत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. $\frac{1}{2}\times2=1$

(i) के निजहृदि विकसन्ति ?

(ii) सन्तः केन पूर्णाः भवन्ति ?

(ब) पूर्णवाक्येन उत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. $1\times2=2$
सन्तः किं कुर्वन्ति ?

(स) यथानिर्देशम् उत्तरत ।
यथानिर्देश उत्तर दीजिए ।
Answer as directed. $1\times2=2$

(i) 'सन्ति' इति क्रियापदस्य कर्तृपदं किम् ?

(ii) 'शरीरे' अस्य पर्यायपदं किम् ?

(ग) **नाट्यांशः**

लव : (प्रविश्य, स्वगतम्) अविज्ञातवयः क्रमौचित्यात् पूज्यानपि सतः कथमभिवादयिष्ये ? (विचिन्त्य) अयं पुनरविरुद्धप्रकार इति वृद्धेभ्यः श्रूयते । (सविनयमुपसृत्य) एष वो लवस्य शिरसा प्रणामपर्यायः ।

अरुन्धतीजनकौ : आयुष्मान् भूयाः ।

कौसल्या : जात ! चिरं जीव ।

अरुन्धती : एहि वत्स ! (लवमुत्संगे गृहीत्वा आत्मगतम्) दिष्ट्या न केवलमुत्संगश्चिरान्मनोरथो अपि मे पूरितः ।

कौसल्या : जात ! इतोऽपि तावदेहि । (उत्संगे गृहीत्वा) अहो, न केवलं मांसलोज्ज्वलेन देहबन्धेन, कलहंसघोष-घर्घरानुनादिना स्वरेण च रामभद्रमनुसरति । जात ! पश्यामि ते मुखपुण्डरीकम् ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. $\frac{1}{2} \times 2 = 1$

(i) कस्य शिरसा प्रणामपर्यायः ?

(ii) लवः कान् अभिवादयितुम् इच्छति ?

(ब) पूर्णवाक्येन उत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. $2 \times 1 = 2$
लवः कथं रामभद्रमनुसरति ?

(स) यथानिर्देशम् उत्तरत ।
यथानिर्देश उत्तर दीजिए ।
Answer as directed. $1 \times 2 = 2$

(i) 'कमलम्' अस्य पर्यायः कः ?

(ii) 'देहबन्धेन' इति विशेष्यपदस्य विशेषणपदं किम् ?

**5.** शब्दार्थान् मेलयित्वा लिखत ।
शब्दों का अर्थों से मिलान करके लिखिए ।
Match the words with their meanings and rewrite the same. $\frac{1}{2} \times 4 = 2$

| | **शब्दाः** | | **अर्थाः** |
|---|---|---|---|
| (अ) | सततम् | (i) | अन्धकारेण |
| (ब) | तमसा | (ii) | प्रयोजनम् |
| (स) | सहसा | (iii) | निरन्तरम् |
| (द) | अर्थः | (iv) | अकस्मात् |

**6.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत ।
रेखांकित पदों के आधार पर प्रश्न-निर्माण कीजिए ।
Frame questions on the basis of the underlined words. $1 \times 4 = 4$

(i) निश्चितं किल सिद्धैः स्वर्गनरकादिकं सर्वं ब्रह्माण्डान्न किञ्चिद्बहिरस्तीति ।

(ii) अस्माभिः पर्वताः शंकवः कृताः ।

(iii) सुश्री मेरी लेखिका आसीत् ।

(iv) समुद्राः सप्त अस्मद् वेदे अपि प्रकटाः भवन्ति ।

**7.** अधोलिखितभावा**र्थयोः** रिक्तस्थानपूर्तिं मञ्जूषापदसहायतया कृत्वा लिखत :

निम्नलिखित **दोनों** भावार्थों में मञ्जूषा में दिए गए शब्दों की सहायता से रिक्तस्थानों की पूर्ति करके लिखिए :

Fill in the blanks in the following **two** explanations with the help of the words given in the box and rewrite the same : *3×2=6*

(अ) "ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ।।"

**भावार्थः**

अस्मिन् (i) ________ यत् किञ्चिदपि चराचरमस्ति, तत् सर्वम् (ii) ________ व्याप्तमस्ति । वस्तुतः संसारस्य सर्वेषु (iii) ________ ईश्वरस्य (iv) ________ अस्ति । अतः मनुष्यैः (v) ________ विषयाणां भोगः कर्तव्यः । मनुष्यैः कस्यापि (vi) ________ लोभः न कर्तव्यः ।

(ब) "तस्मादसक्तः सततं कार्यं कर्म समाचर ।
असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः ।।"

**भावार्थः**

श्रीकृष्णः उपदिशति – यत् (i) __________ निरन्तरम् अनासक्तभावनया (ii) ________ करणीयानि । यदा सः (iii) ________ भूत्वा कर्माणि करोति तदा (iv) ________ सह तस्य (v) ________ न भवति । एवं सः (vi) ________ भूत्वा परमं तत्त्वं प्राप्नोति ।

**मञ्जूषा**

| |
|---|
| मुक्तः, कर्मफलेन, मनुष्यैः, अनासक्तः, कर्माणि, बन्धः, संसारे, त्यागभावनया, वस्तुषु, ईश्वरेण, धनस्य, वासः । |

**8.** अधोलिखितयोः श्लोकयोः अन्वय**द्वये** रिक्तस्थानपूर्तिं कुरुत :

निम्नलिखित **दोनों** श्लोकों के अन्वयों में रिक्त स्थानों की पूर्ति कीजिए :

Fill in the blanks in the following prose-order-renderings of the **two** verses : *$1\frac{1}{2}+1\frac{1}{2}=3$*

(अ) तमर्चयित्वा विधिवद्विधिज्ञः
तपोधनं मानधनाग्रयायी ।
विशांपतिर्विष्टरभाजमारात्
कृताञ्जलिः कृत्यविदित्युवाच ।।

**अन्वयः**

विधिज्ञः मानधनाग्रयायी (i) __________ विष्टरभाजमारात् तं तपोधनं विधिवत् (ii) _________ कृत्यवित् कृताञ्जलिः इति (iii) __________ ।

(ब) समाप्तविद्येन मया महर्षि-
र्विज्ञापितोऽभूद् गुरुदक्षिणायै ।
स मे चिरायास्खलितोपचारां
तां भक्तिमेवागणयत्पुरस्तात् ।।

**अन्वयः**

समाप्तविद्येन मया महर्षिः (i) ________ विज्ञापितो अभूत् । स मे (ii) ________ तां अस्खलितोपचारां (iii) ________ एव पुरस्तात् अगणयत् ।

**9.** यथानिर्देशम् उत्तरत ।

निर्देशानुसार उत्तर दीजिए ।

Answer as directed. *10*

(अ) कर्तृपदं क्रियापदं च चिनुत ।

कर्ता एवं क्रियापद चुनिए ।

Select the subject and the verb. *1×2=2*

(i) पुनरपि राजा सिंहासने समुपवेष्टुं गच्छति ।

(ii) मनुजन्मानः किल स्वार्थसाधनाय सर्वात्मना प्रवर्तन्ते ।

(ब) विशेषणपदं चिनुत ।

विशेषण पद चुनिए ।

Select the adjective. *1×2=2*

(i) मुग्धललितैः अङ्गैः दारकोऽस्माकं लोचने शीतलयति ।

(ii) अज्ञातेन मया रूक्षः व्यवहारः प्रदर्शितः स्यात् ।

(स) अधोलिखितपंक्तिद्वये रेखाङ्कितसर्वनामपदे काभ्यां प्रयुक्ते ?

निम्नलिखित दो पंक्तियों में रेखांकित सर्वनाम पद किनके लिए प्रयुक्त हुए हैं ?

In the following two lines for whom are the underlined pronouns used ? *1×2=2*

(i) विदितवेदितव्यस्याधीतसर्वशास्त्रस्य <u>ते</u> नाल्पमप्युपदेष्टव्यमस्ति ।

(ii) <u>स</u> स्वल्पभाषी, अतस्तस्य मन:कथा बोधगम्या नास्ति ।

(द) अधोलिखितपंक्तिमध्ये 'पराक्रम:' तथा 'दण्ड:' इति पदयो: समानार्थके पदे चित्वा लिखत :

निम्नलिखित पंक्ति में से 'पराक्रम' तथा 'दण्ड' पदों के समानार्थक पद चुनकर लिखिए :

Select and write the synonyms of the words 'पराक्रम:' and 'दण्ड:' from the following line : *1×2=2*

अहं निजशौर्यं प्रकाशयन् महता वीरदर्पेण लगुडमात्रमादाय अन्धकार एव चौरनिग्रहाय प्रचलित: अभवम् ।

(य) क: कं कथयति ?

कौन किसको कह रहा है ?

Who is saying this to whom ? *1×2=2*

(i) जात ! अस्ति ते माता ? स्मरसि वा तातम् ?

(ii) राजन् ! यस्त्वर्थिनां पूरयति, तस्येप्सितं देव: सम्पादयति ।

**10.** (अ) अधोलिखितलेखकानां कस्यापि **एकस्य** काव्यस्य नाम लिखत :

निम्नलिखित लेखकों के किसी **एक** काव्य का नाम लिखिए :

Write the names of any **one** work of each of the following poets : *1×5=5*

कालिदास:, मथुरानाथ शास्त्री, जगन्नाथ:, भर्तृहरि:, भवभूति: ।

(ब) अधोलिखितरचनानां लेखकानां नामानि लिखत :

निम्नलिखित रचनाओं के लेखकों के नाम लिखिए :

Write the names of the authors of the following works : *1×5=5*

शिशुपालवधम्, किरातार्जुनीयम्, पाषाणी कन्या, समुद्र-संगम:, महाभारतम् ।

## खण्डः घ (SECTION D)

## छन्दोऽलङ्काराः

## छन्द एवं अलङ्कार

## Metres and Figures of Speech

*10+10=20 अङ्काः*

**11.** (अ) प्रश्नान् उत्तरत ।

प्रश्नों के उत्तर दीजिए ।

Answer the questions. *1×2=2*

(i) 'विनयः' अत्र को गणः ?

(ii) 'पृथिवी' अत्र 'वी' इति लघुः गुरुः वा ?

(ब) अधोलिखितपरिभाषाः पूरयत :

निम्नलिखित परिभाषाओं को पूर्ण कीजिए :

Complete the following definitions : *1×4=4*

(i) _________ तु वंशस्थमुदीरितं जरौ ।

(ii) स्यादिन्द्रवज्रा यदि तौ _________ ।

(iii) मन्दाक्रान्ताम्बुधि _________ गयुग्मम् ।

(iv) _________ युतेयं मालिनी भोगिलोकैः ।

(स) अधोलिखितयोः **एकस्य** छन्दसः उदाहरणं लिखत :

निम्नलिखित में से **एक** छन्द का उदाहरण लिखिए :

Write an example of any **one** of the following metres : *2×1=2*

अनुष्टुप्, वसन्ततिलका

(द) अधोलिखितपंक्त्योः किं किं छन्दः ?

निम्नलिखित पंक्तियों में कौन-कौन-सा छन्द है ?

What is the metre in the following lines ? *1×2=2*

(i) संवृतिः प्रतिबिम्बितेव निखिला सैवाकृतिः सा द्युतिः ।

(ii) गिरौ कलापी गगने पयोदो ।

**12.** (अ) अधोलिखितयोः कस्यचि**देकस्य** शब्दालङ्कारस्य सोदाहरणं लक्षणं लिखत :

निम्नलिखित में से किसी **एक** शब्दालङ्कार का सोदाहरण लक्षण लिखिए :

Write the definition and example of any **one** of the following शब्दालङ्कार : *3*

अनुप्रासः, यमकम् ।

(ब) अधोलिखितयोः कस्यचि**देकस्य** अर्थालङ्कारस्य लक्षणमुदाहरणं च लिखत :

निम्नलिखित में से किसी **एक** अर्थालङ्कार का लक्षण एवं उदाहरण लिखिए :

Define and illustrate any **one** of the following अर्थालङ्कार : *3*

उपमा, रूपकम् ।

(स) अधोलिखितपङ्क्त्योः अलङ्कारं निर्दिशत :

निम्नलिखित पंक्तियों में अलङ्कार का निर्देश कीजिए :

Indicate the figure of speech in the following lines : *1×2=2*

(i) प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता ।

(ii) अहितमिव परित्यजन्ति आर्जवम् ।

(द) अधोलिखितपरिभाषाद्वयं पूरयत :

निम्नलिखित दोनों परिभाषाओं को पूर्ण कीजिए :

Complete the following definitions of the two figures of speech : *1×2=2*

(i) भवेदर्थान्तरन्यासो __________ ।

(ii) __________ उत्प्रेक्षा प्रकृतस्य परात्मना ।